संस्कृतवार्ताः

14.06.2025

सायम् :- 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्री नरेन्द्र मोदी श्वः साइप्रस्-कनाडा-क्रोएशियादेशानां पञ्च दिवसीययात्रायाः आरम्भं करिष्यति।

· नागरिक-उड्डयन-महानिदेशालयेन भारतीय विमान संघे विद्यमानानाम् चतुस्त्रिंशत् बोईंगत: कानां सप्ताशीत्यधिक-सप्तशतं-विमानानां निरीक्षणाय आदिष्टम् ।

· कैलाश मानसरोवर यात्रा जूनमासस्य विंशति दिनांकात् आरभ्यते।

· इजरायल्-इरान्-देशयोः क्षेपणास्त्र-आक्रमणं भवति; तल अवीव, यरुसलम, तेहरान् च नगरेषु विस्फोटाः श्रूयन्ते स्म।

· दक्षिण आफ्रिकादलेन लण्दन्-नगरस्य लॉड्र्स्-क्रिकेट्-क्रीडाङ्गणे वर्ल्ड-टेस्ट-चैम्पियनशिप-स्पर्धायाः निर्णायक द्वन्द्वे पंच-स्तोभैः आस्ट्रेलिया-दलम् पराजितम्।

<u>प्रधानमन्त्री - गुजरात यात्रा</u>

प्रधानमन्त्री नरेन्द्रमोदी श्वः साइप्रस्, कनाडा, क्रोएशियादेशानां पञ्चदिवसीययात्रायाः आरम्भं करिष्यति। प्रधानमन्त्री मोदी श्वः साइप्रसदेशस्य राष्ट्रपते: निकोस् क्रिस्टोडौ-लिडेस् इत्यस्य आमन्त्रणेन साइप्रसदेशस्य आधिकारिकयात्राम् करिष्यति। दशकद्वये भारतीयप्रधानमन्त्रिणः साइप्रस्-देशस्य प्रथमा यात्रा भविष्यति।

स्वस्य यात्रायाः द्वितीय-पदे कनाडादेशस्य प्रधानमन्त्रिणः मार्क कार्नी इत्यस्य आमन्त्रणेन श्री मोदी जी सप्त शिखरसम्मेलने भागं गृहीतुं कनाडादेशस्य कनानास्किस्-नगरं गमिष्यती, जी- सप्त शिखरसम्मेलने प्रधानमन्त्री षष्ठं वारं भागं स्वीकरिष्यति।

स्वीय यात्रायाः अन्तिम-पदे प्रधानमन्त्री मोदी क्रोएशियादेशस्य आधिकारिकयात्राम् करिष्यति। भारतीयप्रधानमन्त्रिणः क्रोएशियादेशस्य प्रथमा यात्रा भविष्यति, यत् द्विपक्षीयसम्बन्धेषु महत्त्वपूर्णा सिद्धा भविष्यति। प्रधानमन्त्रिणः त्रयाणां राष्ट्राणां यात्रा साइप्रस्-नगरात् आरभ्यते।

## नायडू

नागरिक-उड्डयन मंत्री राम-मोहन-नायडूः अद्य उक्तवान् यत् नागरिक-उड्डयन-महानिदेशालयेन भारतीय विमान संघे विद्यमानानाम् चतुस्त्रिंशत् बोईंगतः विमानोत्पादकानां सप्ताशीत्यधिक-सप्तशतं-विमानानां विस्तृत-निरीक्षणाय आदिष्टम् । तेषु अष्ट तत्कालं निरीक्षितानि।

## कैलाश-मनसरोवर-यात्रिणाम्

कैलाश-मनसरोवर-यात्रिणाम् प्रथमः समूहः श्वः सिक्किमस्य-राजधानीम् -गङ्गटोक्-नगरं संप्राप्स्यति। मुख्यमन्त्री प्रेमसिंह तामाङ्गः नाथुला दर्रेतः यात्रायै प्रस्थानम् कारयिष्यति। पञ्चवर्षस्य अन्तरं जूनमासस्य विंशति दिनांकात् यात्रा आरभ्यते। पर्यटन-नागरिक-विमान-विभागस्य अतिरिक्त-मुख्यसचिवः सी.एस.रावः आकाशवाणी माध्यमेन अवदत् यत् तीर्थयात्रिणां प्रत्येकं समूहः एकादशात् द्वादश दिवसेषु कैलाश-मानसरोवर-यात्रां सम्पन्नं करिष्यति।

## इंडिया- इजरायल्

इजरायल्-इरान्-देशयोः क्षेपणास्त्र-आक्रमणं भवति; तल अवीव, यरुसलम, तेहरान् च नगरेषु विस्फोटाः श्रूयन्ते स्म। यत्र न्यूनातिन्यूनं त्रयः जनाः मृताः, दर्जनशः जनाः आहताः। अपरपक्षे इरानस्य राज्यसञ्चारमाध्यमेषु इजरायलेन आक्रमणेषु ईरानसशस्त्रसेनायाः जनरल् स्टाफस्य उपसेनापतिद्वयं मृतम् इति सूचना दत्ता। इरान्-देशे इजरायल्-देशस्य आक्रमणेषु वरिष्ठसैन्य-अधिकारिभिः सह न्यूनातिन्यूनं अष्टसप्ततिः जनाः मृताः।

ईरान-अमरीका वार्ता

इरानदेशः परमाणुविषये अमेरिकादेशेन सह वार्तालापं निरन्तरं कर्तुं न स्वीकृतवान्। इजरायल्-देशस्य अद्यपर्यन्तं बृहत्तमस्य सैन्य-आक्रमणस्य अनन्तरं परमाणु-कार्यक्रमस्य विषये वार्ता निरर्थिका इति इरान्-देशेन उक्तम्। पूर्वं इरान्-देशेन इजरायल्-देशस्य आक्रमणेषु अमेरिका-देशः सम्मिलितः इति आरोपः कृतः आसीत्, परन्तु अमेरिका-देशः तत् न अङ्गीकृतवान्।

गुजरात विमान दुर्घटना

अहमदाबादे एयर इण्डिया विमानदुर्घटनायाः परीक्षणार्था सर्वकारेण उच्चस्तरीयबहुविषयकसमितिः निर्मिता। मृतानां संख्या चतुरधिक सार्ध द्विशतं यावत् वर्धिता। अहमदाबादे एयर इण्डिया-विमानस्य विनाशकारिण्यां दुर्घटनायां मृतानां संख्या चतुरधिक सार्ध द्विशतं यावत् अभवत्। विमाने द्विचत्वारिंशत् अधिक द्विशतं जनाः आसन्, येषु ऊनसप्तत्यधिक एक शतं भारतीयाः, त्रिपञ्चाशत् ब्रिटिश-राष्ट्रीयाः, सप्त पुर्तगाल-देशीयाः, एकः कनाडा-देशस्य नागरिकः, द्वादश चालकदलस्य सदस्याः च आसन्। एकः एव व्यक्तिः, भारतीयमूलस्य आङ्ग्लदेशीयः, जीवितः। सम्प्रति सिविल-अस्पताले एकत्रिंशत् जनानां चिकित्सा क्रियते, यत्र चिकित्साकर्मचारिणः गम्भीर-उपचार-प्रदानार्थं घण्टां यावत् कार्यं कुर्वन्ति।

दुर्घटनायाः कारणं ज्ञातुं अन्वेषणं प्रचलति। विमानदुर्घटना अन्वेषणब्यूरो (एएआईबी) इत्यस्य दलेन विमानस्य ब्लैक बोक्स इति निगृहीतम्। यत् औपचारिकरूपेण फ़्लाइट डेटा रिकोर्दर् रूपेण प्रसिद्धम्। स्थानीयस्वास्थ्य-पुलिस-सुरक्षा-दलानि उच्च-स्तरीय- संचेतितानि सन्ति।

प्रशासनं मृतानां परिवारेभ्यः यथाशक्ति सहायतां प्रयच्छति। सहाय्योद्धार प्रयासानां समन्वयनार्थं नागरिकचिकित्सालये अहो रात्रम् 24/7 नियन्त्रणकक्षः स्थापितः। शोकग्रस्तपरिवारस्य साहाय्यार्थं निवासस्थानस्य, परिवहनस्य च व्यवस्था अपि कृता। पीडितानां सम्मानार्थं राज्ये सर्वत्र शोकसभाः, सामूहिकप्रार्थनासभाः च आयोज्यन्ते। एकतायाः दृढप्रदर्शने जनाः अपि रक्तदानार्थं, सर्वथा साहाय्यं च दातुं बहुसंख्येन अग्रे आगच्छन्ति।

केन्द्रीयपेट्रोलियममन्त्री- हरदीपसिंहपुरी

केन्द्रीयमन्त्री हरदीपसिंहपुरी आश्वासनं दत्तवान् यत् पश्चिम एशिया-सङ्घर्षस्य मध्ये भारते आगामिमासानां कृते पेट्रोलियम-उत्पादानाम् पर्याप्ता आपूर्तिः अस्ति।

केन्द्रीयपेट्रोलियम-प्राकृतिकगैसमन्त्री हरदीपसिंहपुरी उक्तवान् यत् आगामिनां मासानां कृते देशे पर्याप्तरूपेण ऊर्जा-आपूर्तिः अस्ति। सः ह्यः पेट्रोलियम- सचिवेन भारतीय ऊर्जासार्वजनिकक्षेत्रस्य उपक्रमानाम् प्रमुखैः सह समीक्षासभां कृत्वा सोशल मीडिया पोस्ट् मध्ये एतां सूचनां दत्तवान्। गतदिने इजरायल्-देशेन इरान्-देशे आक्रमणस्य अनन्तरं अन्तर्राष्ट्रीय-तैल-मूल्यानि तीव्ररूपेण उच्छ्रितानि। श्री पुरी इत्यनेन उक्तं यत् भारतं प्रतिवर्षं सार्धैक शतमर्बुद अमेरिकीडॉलर् मूल्यस्य ऊर्जायाः आयातं करोति, तस्य अपरिष्कृतस्य तैलस्य आवश्यकतायाः अशीति- प्रतिशताधिकं आयातद्वारा पूर्यते।

इजरायल्-इरान्-देशयोः क्षेपणास्त्र-आक्रमणं भवति; तेल अवीव, जेरुसलेम, तेहरान् नगरेषु विस्फोटाः अभवन्

मेडिकल नीट यूजी प्रवेशपरीक्षा

मेडिकल प्रवेशाय राष्ट्रियपात्रता सह प्रवेशपरीक्षा-NEET UG 2025 इत्यस्य परिणामः अद्य घोषितः अस्ति। स्कोरकार्ड् परीक्षायाः आधिकारिक वेबसाइट मध्ये- ntaneet.nic.in इत्यत्र उपलब्धम्।

इस्राइल परामर्श

विदेशमन्त्रालयेन भारतीयनागरिकाः इरान्देशे भारतीयमूलस्य जनाः च भारतीयदूतावासस्य आपत्कालिकसङ्ख्याभिः सहायार्थं सम्पर्कं कर्तुं उक्ताः। एतानि सङ्ख्यानि सन्ति नव-अष्ट-नव-एकं-द्वे-अष्ट-एकं-शून्यं-नव-एकं-एकं-पंच। पूर्वं दूतावासेन आग्रहः कृतः यत् सर्वे भारतीयनागरिकाः भारतीयमूलजनाश्च सतर्काः भवन्तु, अनावश्यकक्रियाकलापान् परिहरन्तु, दूतावासस्य सामाजिकमाध्यमेन नियमस्य अनुसरणं कुर्वन्तु, स्थानीयाधिकारिणां सुरक्षाप्रोटोकॉल इत्यस्य च अनुसरणं कुर्वन्तु इति।

## <u>वर्ड-टेस्ट-चैम्पियनशिप</u>

दक्षिण आफ्रिकादलेन सप्तविंशति वर्षेषु प्रथमं वारं आईसीसी-उपाधि: विजित:, लण्दन्-नगरस्य लॉड्र्स्-क्रिकेट्-क्रीडाङ्गणे पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य वर्ड-टेस्ट-चैम्पियनशिप-स्पर्धायाः निर्णायक द्वन्द्वे पंच-स्तोभै: आस्ट्रेलिया-दलम् पराजितम्।

## <u>शूटिंग</u>

सुरुचिसिंहः जर्मनीदेशे लक्ष्यभेदशूटिंग्विश्वकपइत्यत्र महिलानां दश मीटर् एअरपिस्ट्ल इति स्पर्धाया: निर्णायकचक्रे स्वर्णपदकं प्राप्तवती। सुरुचिः अन्तिमचक्रे विश्वकपक्रीडायां तृतीयं स्वर्णपदकं प्राप्तवती। अस्यां स्पर्धायां भारतस्य इदं प्रथमं स्वर्णपदकम् अस्ति।

## <u>मौसम</u>

वायव्यभारते आगामिषु केषुचित् दिवसेषु तापतरङ्गस्य स्थित्यां परिस्कारस्य अपेक्षास्ति। आकाशवाण्या सह चर्चायां भारतऋतुविभागस्य वैज्ञानिकः नरेशकुमारः अवदत् यत् अद्य पञ्जाब-हरियाणा-दिल्ली-एनसीआर- क्षेत्राणां केषुचित् भागेषु सायंकाले वज्रपातेन सह वृष्टेः संभावना विद्यते। अस्मिन्नेव क्रमे राजस्थान-पञ्जाब-हरियाणा-राज्येषु अद्य तीव्र-ताप-तरङ्गाय विभागेन ऑरेंज-अलर्ट इति सन्चेतना प्रसारिता। अत्यन्तं प्रचण्डवृष्ट्या कारणेन आगामि दिन द्वयोः तटीयकर्नाटिक, दक्षिण आन्तरिक कर्नाटिक, केरल, कोङ्कण, गोवा राज्यानां कृते विभागेन रेड अलर्ट् संचेताना प्रसारितास्ति।

## <u>संस्कृत-साप्ताहिकी</u>

संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: श्व: मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

।। इति वार्ता: ।।